दिव्यापित्वेऽपि ग्राह्यता कालमाधवीये निर्णीता यथा । "देवलः "यां तिथिं समनुप्राप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानजपादिष्विति" । व्यासोऽपि "उदयन्नेव सविता यां तिथिं प्रतिपद्यते । सा तिथिः सकला ज्ञेया दानाध्ययनकर्मस्विति" । भविष्योत्तरपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत् । सा तिथिः सकला ज्ञेया पित्रर्थे चाऽपराह्णिकीति" पद्मपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत् । उदये सा तिथिस्तत्र विपरीता तु पैतृके" इति स्कन्दपुराणेऽपि "व्रतोपवासदानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इति विष्णुधर्म्मोत्तरेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनीति" बौधायनोऽपि "आदित्योदयवेलायां याल्पापि च तिथिर्भवेत् । पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विनेति" नन्वस्त्वेवं कृत्स्नदिवसाभ्यनुज्ञा तथाप्युत्तरविद्धायास्तिथेर्ग्रहणे कियत्परिमाणमुदये अपेक्षणीयमिति विवेचनीयम् । तत्र बौधायनेनाल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति तथा व्यासवाक्येऽपि प्रतिभाति "उदयन्नेवे"त्यभिधानात् । भविष्योत्तरपुराणादिवचनेषु घटिकामात्रं प्रतीयते । वचनान्तरे तु विष्णुधर्मोत्तरबौधायनप्रोक्तं घटिकाचतुष्टयं भासते । तथा च पठ्यते "उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ । द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति" । अस्यार्थः । भानावुदिते सत्युत्तरकालेऽह्नो मुहूर्त्तद्वयं दैवतम् । तस्मिंश्चास्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पितृदैवत्यम् । अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या । अतोच्यते । पौर्वाह्णिकी इति वचनेन दैवे पूर्वाह्णव्याप्त्यभिधानात् । पूर्वाह्णस्य पञ्चधा विभक्तस्य मुख्यत्वादुदिते भानौ त्रिमुहूर्त्ता तिथिर्ग्रहीतव्या । यत्तु दक्षेणोक्तम् । त्रिमुहूर्त्ता न कर्त्तव्या या तिथिः क्षयगामिणी "द्विमुहूर्त्तापि कर्त्तव्या सा तिथिर्वृद्धिगामिनीति" । तत्र त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव । तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्चात्र यथोक्तरीत्या पौर्वाह्णिकवाक्यात् त्रिमुहूर्त्तविधायिपैठीनसिवाक्याद्वा भवति । तच्च प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते । तिथिक्षये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते । अतस्तत्र चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या । तिथिसाम्यवत्तिथिवृद्धावपि मुहूर्त्तत्रयमेव मुख्यम् । मुहूर्त्तद्वयं त्वनुकल्पः । अतएव सूचयितुं द्विमुहूर्त्तापीत्यपिशब्दः पठ्यते ।" अत्राप्येकमुहूर्त्तव्याप्तिर्निकृष्टेत्यर्थसिद्धम्

"द्वितीयादिकयुग्मानां पूज्यता नियमादिषु" व्यासः। अत्र प्रतिप्रसवः । "भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" । "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति० त० ।

**तिथिसन्धि** पु० तिथ्योः सन्धिः । तिथ्योः पूर्वापरयोः सन्धौ तन्मानानयनं सि० शि० यथा "शशितनुविकलाभ्यश्चन्द्रभुक्त्येन्दुभान्वोर्गतिविवरकलाभिर्भूय एताभिरेव । पृथगथ गतियुत्या नाडिका सन्धिराप्ता तिथिकरणयोगानां फलं तत्र मिश्रम्"।

एवं शशिबिम्बकलाभ्यो या घटिका उत्पद्यन्ते ता भतिथिकरणयोगानां सन्धिघटिकाः स्युः । सन्धौ मिश्रफलमित्यर्थः । अत्र सन्धिरुभयतोऽपि बिम्बस्य स्थितत्वात् । उपपत्तिरप्यत्र सुगमा" । प्रमिता०

**तिथ्यर्द्ध** न० ६त० । करणे । करणशब्दे १६६० पृ० दृश्यम् ।

**तिनाशक** पु० तिनिश+पृषो० । तिनिशवृक्षे शब्दरत्ना० ।

**तिनिश** पु० अतिशयेन नेशति अति+निश–क पृषो० अतेरकारलोपः । (सादन) ख्याते वृक्षे अमरः । "तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित् । तुवरः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत्" भावप्र० । [२दैत्यभेदे पु० हेमच० ।

**तिन्तिड** पु० तिन्तिडी+पृषो० । १वृक्षाम्ले (तेँतुल) विश्वः

**तिन्तिडी** स्त्री तिन्तिडीक+पृषो० । (तेँतुल) वृक्षभेदे राजनि० स्वार्थे क । तिन्तिडिका तत्रार्थे शब्दरत्ना० । "अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च । अम्ला च विचिका चिञ्चा तिन्तिडीका च तिन्तिडी । अम्लिकाऽम्ला गुरुर्वातहरी पित्तकफास्रकृत् । पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत्" भावप्र० । "अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम् । शर्करामरिचोन्मिश्रं लवङ्गेन्दुसुवासितम् । अम्लिकाफलसंभूतं पानकं वातनाशनम् । पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्" भावप्र० । [अमरः ।

**तिन्तिडीक** पु० तिम–ईक अनीका० नि०। (तेँतुल) वृक्षभेदे